पञ्चमीविभक्ति

उदाहरणानि



- वृक्षात् पर्णं पतति।
- बालः शालायाः पुस्तकानि आनयति।
- जनाः नद्याः गृहम् आगच्छन्ति।
- त्वं गृहात् कुत्र गच्छसि?

अपादानम्



- विभागस्य अवधिः – Point of separation
- ध्रुवमपायेऽपादानम्।
- अपादाने पञ्चमी।
- पतति, गच्छति, आगच्छति, आनयति इत्यादीनां धातूनां विषये 'कस्मात्?'/'कुतः'? इति प्रश्नस्य उत्तरम् अपादानं भवति।

पञ्चमीविभक्ति-एकवचनरूपं वदत

- बालः
- आपणः
- देवः
- मित्रम्
- राष्ट्रम्
- गृहम्
- बालिका
- महिला
- रमा
- सीता
- गिरिजा
- शाला
- नारी
- गौरी
- गोपी
- नदी
- माधवी
- वाणी

- बालः - बालात्
- आपणः - आपणात्
- देवः - देवात्
- मित्रम् - मित्रात्
- राष्ट्रम् - राष्ट्रात्
- गृहम् - गृहात्

- बालिका - बालिकायाः
- महिला - महिलायाः
- रमा - रमायाः
- सीता - सीतायाः
- गिरिजा - गिरिजायाः
- शाला - शालायाः

- नारी - नार्याः
- गौरी - गौर्याः
- गोपी - गोप्याः
- नदी - नद्याः
- माधवी - माधव्याः
- वाणी - वाण्याः

कुतः आगच्छति?



कुतः आगच्छति?

- ग्रामात् आगच्छति।
- नगर्याः आगच्छति।
- शालायाः आगच्छति।
- गृहात् आगच्छति।
- ग्रन्थालयात् आगच्छति।
- लङ्कायाः आगच्छति।
- काश्याः आगच्छति।
- मन्दिरात् आगच्छति।

कस्मात् कुत्र गच्छति?

- बालः - गृहम् -> शाला -> क्रीडाङ्गणम् -> आपणः -> प्रदर्शिनी -> गृहम्
- रमेशः – राजस्थानम् -> देहली -> हिमाचलप्रदेशः -> काश्मीरम् -> कन्याकुमारी
- गिरिजा – अयोध्या -> मथुरा -> काशी -> पुरी -> प्रयागः -> पाटलीपुत्रम्
- वसुधा – भारतम् -> श्रीलङ्का -> लक्षद्वीपः -> ब्रह्मदेशः -> अमेरिका -> सिंहपुरी -> भारतम्

कस्मात् कुत्र गच्छति?

- बालः गृहात् शालां गच्छति। शालायाः क्रीडाङ्गणं गच्छति। क्रीडाङ्गणात् आपणं गच्छति। आपणात् प्रदर्शिनीं गच्छति। प्रदर्शिन्याः गृहं गच्छति।
- रमेशः राजस्थानात् देहलीं गच्छति। देहल्याः हिमाचलप्रदेशं गच्छति। हिमाचलप्रदेशात् काश्मीरं गच्छति। काश्मीरात् कन्याकुमारीं गच्छति।
- गिरिजा अयोध्यायाः मथुरां गच्छति। मथुरायाः काशीं गच्छति। काश्याः पुरीं गच्छति। पुर्याः प्रयागं गच्छति। प्रयागात् पाटलीपुत्रं गच्छति।
- वसुधा भारतात् श्रीलङ्कां गच्छति। श्रीलङ्कायाः लक्षद्वीपं गच्छति। लक्षद्वीपात् ब्रह्मदेशं गच्छति। ब्रह्मदेशात् अमेरिकां गच्छति। अमेरिकायाः सिंहपुरीं गच्छति। सिंहपुर्याः भारतं गच्छति।

कुतः किं पतति?

- वृक्षः – फलम्
- आकाशः – तोयम्
- स्वर्गः – पुष्पाणि
- हस्तः – पुस्तकम्
- नेत्रम् – अश्रूणि
- अङ्गुली – अङ्गुलीयकम्
- मस्तकम् – केशाः
- शाखा – पर्णानि
- अश्वः – योधः
- निश्रेणी – बालः
- दोला – बाला
- उल्का - शिलाखण्डाः

कुतः किं पततिः?

- वृक्षात् फलं पतति।
- आकाशात् तोयं पतति।
- स्वर्गात् पुष्पाणि पतन्ति।
- हस्तात् पुस्तकं पतति।
- नेत्रात् अश्रूणि पतन्ति।
- अङ्गुल्याः अङ्गुलीयकं पतति।
- मस्तकात् केशाः पतन्ति।
- शाखायाः पर्णानि पतन्ति।
- अश्वात् योधः पतति।
- निश्रेण्याः बालः पतति।
- दोलायाः बाला पतति।
- उल्कायाः शिलाखण्डाः पतन्ति।

पञ्चमीविभक्तिरूपाणि



बालात्	बालाभ्याम्	बालेभ्यः
मित्रात्	मित्राभ्याम्	मित्रेभ्यः
बालिकायाः	बालिकाभ्याम्	बालिकाभ्यः
नार्याः	नारीभ्याम्	नारीभ्यः

कस्मात् किम् आनयति(सर्वेषु वचनेषु)

वस्तूनि
आपणः
सस्यानि वनम्
ग्रामः फलानि
पुष्पाणि उद्यानम्
बालकः
देवालयः प्रसादः
जलम् तीर्थम्
ग्रन्थालयः पुस्तकानि
नगरम्
वस्त्राणि

कस्मात् किम् आनयति(सर्वेषु वचनेषु)



- आपणात् वस्तूनि आनयति।
- ग्रामात् फलानि आनयति।
- देवालयात् प्रसादम् आनयति।
- ग्रन्थालयात् पुस्तकानि आनयति।
- नगरात् वस्त्राणि आनयति।
- तीर्थात् जलम् आनयति।
- उद्यानात् पुष्पाणि आनयति।
- वनात् सस्यानि आनयति।


कस्मात् किं स्वीकरोति (सर्वेषु वचनेषु)
पुष्प
बालिका
फल
तापसी
अग्रजा
शाटिका
लेखनी
सहोदरी
रमा
अनुजा
पुस्तिका
घट
गोपी
वृद्धा
स्यूत
कर्मकरी
मार्जनी

कस्मात् किं स्वीकरोति (सर्वेषु वचनेषु)

- रमा बालिकायाः/बालिकाभ्याम्/बालिकाभ्यः पुष्पाणि स्वीकरोति।
- रमा अग्रजायाः/अग्रजाभ्याम्/अग्रजाभ्यः शाटिकाः स्वीकरोति।
- रमा अनुजायाः/अनुजाभ्याम्/अनुजाभ्यः पुस्तिकाः स्वीकरोति।
- रमा वृद्धायाः/वृद्धाभ्याम्/वृद्धाभ्यः स्यूतान् स्वीकरोति।
- रमा कर्मकर्याः/कर्मकरीभ्याम्/कर्मकरीभ्यः मार्जनीः स्वीकरोति।
- रमा गोप्याः/गोपीभ्याम्/गोपीभ्यः घटान् स्वीकरोति।
- रमा सहोदर्याः/सहोदरीभ्याम्/सहोदरीभ्यः लेखनीः स्वीकरोति।
- रमा तापस्याः/तापसीभ्याम्/तापसीभ्यः फलानि स्वीकरोति।



- भयस्य कारणम् – Source of fear
- 'भीत्रार्थानां भयहेतुः'
- भयम्, भीतिः, भीतः, भीः, बिभेति, त्रस्यति, इत्यादीनां प्रयोगे भयस्य यत् मूलम् तस्मात् पञ्चमीविभक्तिः।
- रक्षति, पाति, त्रायते इत्यादीनामपि प्रयोगे भयस्य यत् मूलं तस्मात् पञ्चमी।



- बालः व्याघ्रात् बिभेति।
- मम परीक्षायाः भीतिः नास्ति।
- सा सर्पात् भीता।
- सर्वदमनस्य कस्माद् अपि भयं नास्ति।

बालकः कस्मात् भीतः?





बालकः कस्मात् भीतः?



- सिंहात् भीतः।
- मित्रात् भीतः।
- सूच्याः भीतः।
- परीक्षायाः भीतः।
- शालायाः भीतः।
- जनकात् भीतः।
- पितामह्याः भीतः।
- वैफल्यात् भीतः।

केभ्यः भयम्?





केभ्यः भयम्?

- चोरेभ्यः भयम्।
- नारीभ्यः भयम्।
- मित्रेभ्यः भयम्।
- परीक्षाभ्यः भयम्।
- राक्षसीभ्यः भयम्।
- सर्पेभ्यः भयम्।
- औषधेभ्यः भयम्।
- छुरिकाभ्यः भयम्।



- आरक्षकाः – चोराः
- वैद्यः – रोगाः
- राजा – समस्याः
- वृष्टिः – अवग्रहः
- छत्रम् - आतपः
- देवः - संसारः
- पादरक्षा – कण्टकानि
- वस्त्राणि – शैत्यम्
- ज्ञानम् – अविवेकिता
- सन्मित्रम् – पापम्
- नाविकः – प्रवाहः
- गुरुः – अज्ञानम्

रक्षति, पाति, त्रायते इत्यादीनामपि प्रयोगे भयस्य यत् मूलं तस्मात् पञ्चमी।



- आरक्षकाः चोरेभ्यः रक्षन्ति।
- वैद्यः रोगेभ्यः रक्षति।
- राजा समस्याभ्यः रक्षन्ति।
- वृष्टिः अवग्रहात् रक्षति।
- छत्रम् आतपात् रक्षति।
- देवः संसारात् रक्षति।
- पादरक्षा कण्टकेभ्यः रक्षति।
- वस्त्राणि शैत्यात् रक्षन्ति।
- ज्ञानम् अविवेकितायाः रक्षति।
- सन्मित्रं पापात् रक्षति।
- नाविकः प्रवाहात् रक्षति।
- गुरुः अज्ञानात् रक्षति।

अपादानम् ३ - उदाहरणानि



- गङ्गा हिमालयात् प्रभवति।
- कावेरी उदकमण्डलात् प्रभवति।

कुतः प्रभवति?

- ब्रह्मपुत्रः – हिमालयः
- सिन्धुः – मानससरोवरः
- यमुना - यमुनोत्रिहिमशैलः
- कृष्णा – महाबलेश्वरः
- नर्मदा – अमरकण्टकम्
- गोदावरी - ब्रह्मगिरिपर्वतः

- तुङ्गा – वराहपर्वतः
- महानदी – सिहवापर्वतः
- ताम्रपर्णी – अगस्त्यकूटः
- भद्रा – गङ्गामूलम्
- शरावती – अम्बुतीर्थम्
- तपती - सात्पुरपर्वतः

कुतः प्रभवति?

- ब्रह्मपुत्रः हिमालयात् प्रभवति।
- सिन्धुः मानससरोवरात् प्रभवति।
- यमुना यमुनोत्रिहिमशैलात् प्रभवति।
- कृष्णा महाबलेश्वरात् प्रभवति।
- नर्मदा अमरकण्टकात् प्रभवति।
- गोदावरी ब्रह्मगिरिपर्वतात् प्रभवति।
- तुङ्गा वराहपर्वतात् प्रभवति।
- महानदी सिहवापर्वतात् प्रभवति।
- ताम्रपर्णी अगस्त्यकूटात् प्रभवति।
- भद्रा गङ्गामूलात् प्रभवति।
- शरावती अम्बुतीर्थात् प्रभवति।
- तपती सात्पुरपर्वतात् प्रभवति।

सर्वनाम्नां पञ्चमीविभक्तिरूपाणि



तस्मात्	ताभ्याम्	तेभ्यः
तस्याः	ताभ्याम्	ताभ्यः
एतस्मात्	एताभ्याम्	एतेभ्यः
एतस्याः	एताभ्याम्	एताभ्यः
मत्	आवाभ्याम्	अस्मत्
त्वत्	युवाभ्याम्	युष्मत्

अभ्यासः – १ (सर्वेषु वचनेषु)







- तस्मात् स्वीकरोति।
- एतस्याः स्वीकरोति।
- मत् स्वीकरोति।
- तस्याः स्वीकरोति।
- त्वत् स्वीकरोति।
- एतस्मात् स्वीकरोति।

अभ्यासः – २ (सर्वेषु वचनेषु)







- तस्मात् भीतः।
- एतस्याः भीतः।
- मत् भीतः।
- तस्याः भीतः।
- त्वत् भीतः।
- एतस्मात् भीतः।

अभ्यासः – ३ (सर्वेषु वचनेषु)







- तस्मात् प्रभवति।
- एतस्याः प्रभवति।
- मत् प्रभवति।
- तस्याः प्रभवति।
- त्वत् प्रभवति।
- एतस्मात् प्रभवति।

उपपदपञ्चमी - बहिः



- गृहात् बहिः उद्यानम् अस्ति।
- शालायाः बहिः क्रीडाङ्गणम् अस्ति।
- जलात् बहिः मीनः न जीवति।



- ग्रामः – नदी प्रवहति।
- द्वारम् – भटः अस्ति।
- देवालयः – प्राकारः अस्ति।
- प्रकोष्ठः – जनाः उपविशन्ति।
- गृहम् – शुनकः अस्ति।
- स्थानकम् – यानं तिष्ठति।
- अयोध्या – सरयूनदी प्रवहति
- काशी – गङ्गा प्रवहति
- मथुरा – यमुना प्रवहति
- काञ्ची – वेगवती प्रवहति
- द्वारका – गोमती प्रवहति
- धर्मपुरी – गोदावरी प्रवहति



- ग्रामात् बहिः नदी प्रवहति।
- द्वारात् बहिः भटः अस्ति।
- देवालयात् बहिः प्राकारः अस्ति।
- प्रकोष्ठात् बहिः जनाः उपविशन्ति।
- गृहात् बहिः शुनकः अस्ति।
- स्थानकात् बहिः यानं तिष्ठति।
- अयोध्यायाः बहिः सरयूनदी प्रवहति
- काश्याः बहिः गङ्गा प्रवहति
- मथुरायाः बहिः यमुना प्रवहति
- काञ्च्याः बहिः वेगवती प्रवहति
- द्वारकायाः बहिः गोमती प्रवहति
- धर्मपुर्याः बहिः गोदावरी प्रवहति

उपपदपञ्चमी – पूर्व/पर



- चैत्रः वैशाखात् पूर्वः।
- रामः लक्ष्मणात् पूर्वः।
- फेब्रवरीमासः जनवरीमासात् परः।
- स्नानात् पूर्वं दन्तधावनं करोति।
- भोजनात् परं निद्राति।

अभ्यासः – ५ (पूर्वः/परः)



- चैत्रः
- वैशाखः
- ज्येष्ठः
- आषाढः
- श्रावणः
- भाद्रपदः
- आश्वयुजः
- कार्त्तिकः
- मार्गशीर्षः
- पुष्यः
- माघः
- फाल्गुनः



- चैत्रः वैशाखात् पूर्वः।
- वैशाखः ज्येष्ठात् पूर्वः।
- ज्येष्ठः आषाढात् पूर्वः।
- आषाढः श्रावणात् पूर्वः।
- श्रावणः भाद्रपदात् पूर्वः।
- भाद्रपदः आश्वयुजात् पूर्वः।
- आश्वयुजः कार्त्तिकात् पूर्वः।
- कार्त्तिकः मार्गशीर्षात् पूर्वः।
- मार्गशीर्षः पुष्यात् पूर्वः।
- पुष्यः माघात् पूर्वः।
- माघः फाल्गुनात् पूर्वः।
- फाल्गुनः चैत्रात् पूर्वः।



- चैत्रः फाल्गुनात् परः।
- वैशाखः चैत्रात् परः ।
- ज्येष्ठः वैशाखात् परः ।
- आषाढः ज्येष्ठात् परः ।
- श्रावणः आषाढात् परः ।
- भाद्रपदः श्रावणात् परः ।
- आश्वयुजः भाद्रपदात् परः ।
- कार्त्तिकः आश्वयुजात् परः ।
- मार्गशीर्षः कार्त्तिकात् परः ।
- पुष्यः मार्गशीर्षात् परः ।
- माघः पुष्यात् परः ।
- फाल्गुनः माघात् परः ।

अभ्यासः – ६ (पूर्वम्/परम्)



- उत्थानम्
- दन्तधावनम्
- स्नानम्
- देवपूजनम्
- अल्पाहारः
- शालागमनम्
- क्रीडनम्
- पठनम्
- गृहकार्यस्य लेखनम्
- स्तोत्रकथनम्
- भोजनम्
- निद्रा



- उत्थानात् परं दन्तधावनं करोति।
- दन्तधावनात् परं स्नानं करोति।
- स्नानात् परं देवपूजनं करोति।
- देवपूजनात् परं अल्पाहारं खादति।
- अल्पाहारात् परं शालां गच्छति।
- क्रीडनात् परं पठति।
- पठनात् परं गृहकार्यं लिखति।
- गृहकार्यस्य लेखनात् परं स्तोत्रं कथयति।
- स्तोत्रकथनात् परं भोजनं करोति।
- भोजनात् परं निद्राति।



- दन्तधावनात् पूर्वम् उत्तिष्ठति।
- स्नानात् पूर्वं दन्तधावनं करोति।
- देवपूजनात् पूर्वं स्नानं करोति।
- अल्पाहारात् पूर्वं देवपूजनं करोति।
- शालागमनात् पूर्वं अल्पाहारं खादति।
- पठनात् पूर्वं क्रीडति।
- गृहकार्यस्य लेखनात् पूर्वं पठति।
- स्तोत्रकथनात् पूर्वं गृहकार्यं लिखति।
- भोजनात् पूर्वं स्तोत्रं कथयति।
- निद्रायाः पूर्वं भोजनं खादति।

उपपदपञ्चमी – ऋते/विना



- जलात् ऋते/विना मीनाः न जीवन्ति।
- रामात् ऋते/विना कः रक्षति?
- भगवत्याः ऋते/विना शरणं नास्ति।

अभ्यासः – ७ (ऋते/विना नास्ति)



- व्याकरणम् – शब्दज्ञानम्
- ज्ञानम् – कैवल्यम्
- धनम् - जीवनम्
- श्रमः – सिद्धिः
- व्यायामः – आरोग्यम्
- प्रकाशः - छाया
- विद्या – विवेकः
- दया – धर्मः
- धारणा - ध्यानम्
- पार्वती – परमेश्वरः
- लक्ष्मीः – नारायणः
- सरस्वती - ब्रह्मा



- व्याकरणात् ऋते शब्दज्ञानं नास्ति।
- ज्ञानात् ऋते कैवल्यं नास्ति।
- धनात् ऋते जीवनं नास्ति।
- श्रमात् ऋते सिद्धिः नास्ति।
- व्यायामात् ऋते आरोग्यं नास्ति।
- प्रकाशात् ऋते छाया नास्ति।
- विद्यायाः ऋते विवेकः नास्ति।
- दयायाः ऋते धर्मः नास्ति।
- धारणायाः ऋते ध्यानं नास्ति।
- पार्वत्याः ऋते परमेश्वरः नास्ति।
- लक्ष्म्याः ऋते नारायणः नास्ति।
- सरस्वत्याः ऋते ब्रह्मा नास्ति।



- व्याकरणं/व्याकरणेन/व्याकरणात् विना शब्दज्ञानं नास्ति।
- ज्ञानं/ज्ञानेन/ज्ञानात् विना कैवल्यं नास्ति।
- धनं/धनेन/धनात् विना जीवनं नास्ति।
- श्रमं/श्रमेण/श्रमात् विना सिद्धिः नास्ति।
- व्यायामं/व्यायामेन/व्यायामात् विना आरोग्यं नास्ति।
- प्रकाशं/प्रकाशेन/प्रकाशात् विना छाया नास्ति।
- विद्यां/विद्यया/विद्यायाः विना विवेकः नास्ति।
- दयां/दयया/दयायाः विना धर्मः नास्ति।
- धारणां/धारणया/धारणायाः विना ध्यानं नास्ति।
- पार्वतीं/पार्वत्या/पार्वत्याः विना परमेश्वरः नास्ति।
- लक्ष्मीं/लक्ष्म्या/लक्ष्म्याः विना नारायणः नास्ति।
- सरस्वतीं/सरस्वत्या/सरस्वत्याः विना ब्रह्मा नास्ति।

उपपदपञ्चमी – भिन्नः/अन्यः/इतरः



- रामः कृष्णाद् भिन्नः न।
- आचार्याद् अन्या गतिः नास्ति।
- मित्राद् इतरः कः साहाय्यं करोति?

अभ्यासः – ३ (अन्यत् शरणं न)



- रामः
- देवी
- सन्मित्रम्
- महेश्वरः
- सीता
- सत्यम्
- धर्मः
- गङ्गा
- गायत्री
- ज्ञानम्
- स्वाध्यायः
- शिवा
- गुरुचरणौ
- रामलक्ष्मणौ
- सीतारामौ
- सज्जनाः
- मुनिवराः
- देवाः

पञ्चमीविभक्तिः – सङ्क्षेपः



- अपादाने पञ्चमी
  - विभागस्य अवधिः। वृक्षात् पतति। ग्रामाद् आगच्छति।
  - भयस्य कारणम्। व्याघ्राद् बिभेति। चोरेभ्यः रक्षति।
  - नद्याः प्रभवः। हिमालयाद् गङ्गा प्रभवति।
- उपपदपञ्चमी
  - बहिः। गृहाद् बहिः। शालायाः बहिः।
  - पूर्व/पर। चैत्रः वैशाखात् पूर्वः। स्नानात् परं भोजनं करोति।
  - ऋते/विना। ज्ञानाद् ऋते कैवल्यं नास्ति। जलाद् विना मीनाः न जीवन्ति।
  - भिन्नः/अन्यः/इतरः। तस्माद् भिन्नः। कृष्णाद् अन्यः।

विभक्तिवल्लरी

प्रथमा

द्वितीया

तृतीया

चतुर्थी

पञ्चमी

षष्ठी

सप्तमी

सम्बोधनप्रथमा

संस्कृतभारती
बेङ्गलूरु- ८५

पञ्चमी

I. *विभागः यदा भवति तदा यः **अवधिभूतः भवति तस्य** पञ्चमीविभक्तिः भवति ।*

उदा – वृक्षात् पर्णं पतति ।

(पञ्चम्यर्थे ' ...... तः' इति प्रयोगः सरलः । 'तः' (तस्) इत्येतत् अव्ययम् । अतः सर्वेषु लिङ्गेषु तस्य समानं रूपम् ।)

अभ्यासः – (i) गोविन्दस्य गृहे कश्चन कार्यक्रमः आसीत् । कार्यक्रमार्थं विभिन्नस्थलेभ्यः विभिन्नाः जनाः आगताः । कः कुतः आगतवान् इति अधः निर्दिष्टम् अस्ति । तदाधारेण वाक्यानि रचयत ।

मैसुरु	मातुलः	१. मैसूरुतः * मातुलः आगतवान् ।
काशी	अनुजः	२. .... ।
केदार	स्नेहितः	३. .... ।
मद्रास्	भगिनी	४. .... ।
तिरुवनन्तपुर	अग्रजः	५. .... ।
पुणे	भागिनेयः	६. .... ।
कलकत्ता	अनुजा	७. .... ।
कालटि	गुरुः	८. .... ।
ग्रामः	पितामहः	९. .... ।
हैदराबाद	मातामही	१०. .... ।

(ii) *गोविन्दस्य गृहस्य कार्यक्रमार्थं विविधस्थानतः विविधानि वस्तूनि आनीतानि । कस्मात् किम् आनीतम् इति अधः निर्दिष्टम् अस्ति । तदाधारेण वाक्यानि रचयत ।*

आपणः	तण्डुलाः
वित्तकोशः	धनम्
विपणिः	शाकाः
उद्यानम्	आम्रपर्णानि
मित्रगृहम्	वस्त्रकटाः
प्रतिवेशिगृहम्	पात्राणि
शाला	दीर्घपीठानि
ग्रामः	कदलीपत्राणि
जलागारम्	जलम्
क्षीरकेन्द्रम्	क्षीरम्

१. आपणतः तण्डुलाः आनीताः ।

२. .... ।

३. .... ।

४. .... ।

५. .... ।

६. .... ।

७. .... ।

८. .... ।

९. .... ।

१०. .... ।

II. यस्मात् **भीतिः** भवति, तस्य पदस्य पञ्चमीविभक्तिः भवति ।

उदा - व्याघ्रात् जनाः भीताः भवन्ति ।

अभ्यासः - कः कस्मात् भीतः इति अधः निर्दिष्टम् अस्ति । तदाधारेण वाक्यानि रचयत ।

रावणः	रामः
महाराजः	शत्रुः
चोरः	आरक्षकः
बालकः	पिशाचः
सज्जनः	दुर्जनः

१. रावणः रामतः भीतः अस्ति ।

२. .... ।

३. .... ।

४. .... ।

५. .... ।

देवाः	राक्षसाः
जनाः	चोराः
सर्वे	कष्टानि
अश्वाः	व्याघ्राः
वयम्	दुष्टाः

६. देवाः .... भीताः सन्ति ।

७. .... ।

८. .... ।

९. .... ।

१०. .... स्मः ।

III. यदा रक्षणं भवति तदा **यस्मात् रक्षणं** प्राप्यते तस्य पञ्चमीविभक्तिः भवति ।

उदा – देवः अपायात् मां रक्षितवान् ।

अभ्यासः – कः कस्मात् कं रक्षितवान् इति अधः सूचितम् अस्ति । तदाधारेण वाक्यानि रचयत ।

विष्णुः	मकरः	गजेन्द्रः	१. विष्णुः मकरतः गजेन्द्रं रक्षितवान् ।
राजा	शत्रुः	जनाः	२. .... ।
रामः	रावणः	सीता	३. .... ।
बालकः	अपायः	भगिनी	४. .... ।
आरक्षकाः	चोराः	जनाः	५. .... ।
देवः	कष्टानि	भक्तः	६. .... ।
इन्द्रः	दानवाः	देवाः	७. .... ।
कृष्णः	कौरवाः	पाण्डवाः	८. .... ।

IV. **'बहिः', 'आरभ्य', 'ऋते', 'पूर्वं', 'परः'** इत्येतेषां शब्दानां प्रयोगे पञ्चमीविभक्तिः भवति ।

उदा – १. सः गृहतः बहिः गतवान् ।

२. गुरुवासरतः आरभ्य मम ज्वरः ।

अभ्यासः – आवरणे दत्तानां शब्दानाम् उचितैः पञ्चम्यन्तरूपैः रिक्तस्थलानि पूरयत ।

यथा –

> ...... (देवालयः) बहिः भक्ताः सन्ति ।
>
> देवालयतः बहिः भक्ताः सन्ति ।

१. किमर्थं जनाः ..... (कार्यालयः) बहिः स्थिताः दृश्यन्ते ?

२. .... (सप्ताहः) आरभ्य छात्रसङ्ख्या न्यूना अस्ति ।

३. .... (पठनम्) पूर्वं भवान् उपाहारं स्वीकरोतु ।

४. .... (उत्थानम्) परं भवती देवं नमस्करोतु ।

५. .... (आरक्षकः) ऋते दुष्टं निग्रहीतुं कः शक्नुयात् ?

६. ऋते ...... (भवान्), अन्यः कोऽपि एवं न उक्तवान् ।

७. अस्यां क्रीडायां यः ..... (रेखा) बहिः गच्छति सः बाह्यः भवति ।

८. .... (सूर्योदयः) आरभ्य कृषिकः कार्यं करोति ।

९. भवान् .... (शयनम्) पूर्वं सकृत् पाठं पठतु ।

१०. मूषकस्य .... (बिलम्) बहिः मार्जारः स्थितः अस्ति ।

११. उपदेशस्य .... (श्रवणम्) परं मम खेदः अपगतः ।

१२. .... (आपणः) बहिः कानिचन वस्तूनि पतितानि सन्ति ।

अधोनिर्दिष्टं कोष्टकं पठत ।

पञ्चमीविभक्त्यन्तानि रूपाणि			
	पुं.	स्त्री.	नपुं.
अकारान्तः	बालात् बालेभ्यः		पुस्तकात् पुस्तकेभ्यः
आकारान्तः		बालायाः बालाभ्यः	
इकारान्तः	हरेः हरिभ्यः	मतेः मतिभ्यः	दध्नः दधिभ्यः
ईकारान्तः		गौर्याः गौरीभ्यः	
उकारान्तः	गुरोः गुरुभ्यः	धेनोः धेनुभ्यः	मधुनः मधुभ्यः
ऋकारान्तः	पितुः पितृभ्यः	मातुः मातृभ्यः	
ऋकारान्तः	कर्तुः कर्तृभ्यः		

V. अधोनिर्दिष्टानां पञ्चमीविभक्तिरूपाणि लिखत ।

		ए.व.	ब.व.
उदा	सेवकः	सेवकात्	सेवकेभ्यः

	ए.व.	ब.व.
१. गृहम्	....	....
२. जलपातः	....	....
३. अङ्गुली	....	....
४. तिथिः	....	....
५. भूमिः	....	....
६. दुहिता	....	....

VI. आवरणे दत्तानां पदानां पञ्चम्यन्तेन (ए.व.) रूपेण रिक्तस्थलं पूरयत ।

उदा – सः ग्रामात् (ग्रामः) आगतवान् ।

१. इदानीन्तनाः छात्राः .... (शिक्षकः) भीताः न भवन्ति ।

२. षण्मुखः .... (गणपतिः) पूर्वः ।

३. सा .... (सखी) ऋते अन्यैः सह वार्तालापं न करोति ।

४. सुनीलः .... (काशी) आगतवान् अस्ति ।

५. वानरः .... (शाखा) पतितवान् ।

६. तस्य पुत्रः .... (दुहिता) परः ।

७. .... (नेता) ऋते कार्यकर्तारः निरुत्साहिनः भवन्ति ।

८. बालाः .... (जन्तुः) भीताः भवन्ति ।

९. .... (रज्जुः) वस्त्राणि पतन्ति ।

१०. भवान् .... (भ्रमः) मुक्तः भवतु ।

VII. आवरणे दत्तानां पदानां पञ्चमीबहुवचनान्तेन रूपेण रिक्तस्थानानि पूरयत ।

१. संस्कारयुक्तशिक्षणं .... (दुष्टसन्ततिः) समाजं रक्षति ।

२. घनेभ्यः .... (दधि) उत्तमं नवनीतं प्राप्नुमः ।

३. .... (तृणराशिः) किञ्चित् तृणम् आनय ।

४. .... (अहिः) जनाः भीताः ।

५. .... (पौत्री) ऋते मातामही कार्यक्रमं न गच्छति ।


६. मातरः .... (शिशुः) क्षीरकूर्पीं स्वीकृतवत्यः ।

७. गूढचराः .... (महाराजः) भीताः अभवन् ।

८. रामः विभीषणं .... (दुष्टभ्राता) रक्षितवान् ।

९. ऋते .... (दुहिता) तस्याः अन्यबान्धवाः के ?

१०. कर्मकराः .... (कार्यालयः) बहिः स्थितवन्तः सन्ति ।



संस्कृतं भारतम्
पञ्चमी विभक्तिः
अपादाने
जुगुप्सा अर्थे
विरामार्थे
प्रमादार्थे
भयार्थे
त्राणार्थे
लज्जार्थे
जननार्थे
प्र-भू धात्वर्थे
येन पठ्यते
अन्यार्थे
इतरार्थे
ऋते अर्थे
पृथक् योगे
विना योगे
उद्यमे
उद्योगे
तुलना अर्थे
बहिर्योगे
अनन्तरयोगे
प्रभृतियोगे

अपादाने	वृक्षात् पत्रं पतति
विरामार्थे	सत्यनिष्ठावान् जनः कर्त्तव्यात् न कदापि विरमति।
जुगुप्सा अर्थे	भक्तः पापात् जुगुप्सते
अनन्तरयोगे	सोमवासरात् अनन्तरमागमिष्यामि
बहिर्योगे	नगरात् बहिः रमणीयमुद्यानमस्ति
तुलना अर्थे	रामः श्यामात् पटुतरः अस्ति
उद्योगे	उद्योगात् नरः सर्वं प्राप्तुमर्हति
उद्यमे	उद्यमात् विना धनं न लभते
विना योगे	ज्ञानात् विना न मुक्तिः
ऋते अर्थे	श्रमात् ऋते कुतः विद्या
त्राणार्थे	वीरः बालकं सिंहात् त्रायते
प्रभृतियोगे	शैशवात् प्रभृति न कदापि अनृतमुक्तम्
लज्जार्थे	वधुः श्वसुरात् लज्जते
जननार्थे	ब्रह्मणः प्रजाः जायन्ते
प्र-भू धात्वर्थे	गंगा हिमालयात् प्रभवति
येन पठ्यते	छात्रः अध्यापकात् अधीते
अन्यार्थे	ईश्वरात् अन्यः कः रक्षकः
भयार्थे	बालकः कुक्कुरात् बिभेति
प्रमादार्थे	स्वाध्यायात् मा प्रमदितव्यम्
इतरार्थे	धर्मात् इतरः कः अवलम्बः
पृथक् योगे	श्रमात् पृथक् कुतः विद्या

संस्कृतं भारतम्

